Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 1 | ISSN : 2582-0095

# सात्त्विकपुराणान्तर्गतविष्णुपुराणे अष्टाङ्गयोगपर्यालोचनम्

**कोन्डूरु हरिबाबु**

**शोधच्छात्रः,सांख्ययोग विभागः,राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः।**

**Article Info**

Volume 7, Issue 1
**Page Number :** 69-75

**Publication Issue :**
January-February-2024

**Article History**
Accepted : 25 Jan 2024
Published : 15 Feb 2024

Abstract : मनः एव कारणं विषये आसक्तं मनः बन्धाय कल्पते विषयात् निष्क्रान्तं मुक्तये भवति । प्राणिनः आत्मानं भवबन्धेश्यः मोचयितुं इच्छा स्वयं जाता भवेत् एवं मोचन, मोचनेच्छा इति द्वयं यदा समान कर्तुकं भवति तदेव मुमुक्षशब्दः सार्थको भवति । प्रथमं योगासक्तः योग युक् इति लब्धब्रह्मज्ञानः विनिष्पन्न समाधिः इति व्यवहृतो भवति । कदाचित् जातवैराग्यस्यापि विघ्नान्तरायैः योगः भग्नो भवति तथापि युञ्जानस्य योगः जन्मान्तर साध्यः भवति ।

**यद्धन्तरायदोषेण दूष्यते चास्य मानसम् ।**

**जन्मान्तरैरभ्यसतो मुक्तिः पूर्वस्य जायते ॥**

Keywords :- पुराणम् , योगः, पतञ्जलि, मोक्षः, योगाङ्गानां, ईश्वरः, यम, नियम, आसन, प्राणायाम, प्रत्याहार, धारणा, ध्यान, समाधिः।

योगो नाम मनसः आत्मना संयोगः इति पुराणे उपवर्णितः । तादृश संयोगः कथंकारं करणीयः इति युयुक्षोः संशयं भवत्येव बन्धस्य मोक्षस्य वा मनः एव कारणं विषये आसक्तं मनः बन्धाय कल्पते विषयात् निष्क्रान्तं मुक्तये भवति । अतः विषयेभ्यः मनः व्यावृत्तं कृत्वा ईश्वरचिन्तायां निमग्नं कुर्यात् तथा यत्नकरणमेव ईश्वर प्रणिधानं नाम क्रियायोगः । तन्नामकः नियमश्च । विषयाः इन्द्रियाणां सदा आकर्षकाः भवन्ति अतः तदाकर्षण व्यावृत्तये आत्मप्रयत्नः करणीयः ।तस्मिन्नेव यत्ने मनः आत्मना संयुक्तं भवति इति योगसिद्धान्तः केशिध्वजेन श्लोकचतुष्टये सारभूतः निरूपितः ।

**मन एवं मनुष्याणां कारण बन्धमोक्षयोः ।**
**बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः ॥**
**विषयेश्यस्समाहृत्य विज्ञानात्मा मनो मुनिः ।**
**चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥**
**आत्मभावं नयत्येनं तद्ब्रह्म ध्यायिनं मुनिम् ।**
**विकार्यमात्मनश्शक्त्या लोहमाकर्षको यथा ॥**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**आत्मप्रयत्नसापेक्षा विशिष्टय या मनोगतिः ।**

**तस्या ब्रह्मणि संयोगो योग इत्यभिधीयते ॥"[1]**

पष्ठांशे सप्तमाध्याये अनन्तरवर्तिषु श्लोकेषु योगाङ्गानां निरूपणं सम्प्रज्ञातसमाधेः स्वरूपं निरूपितम्। श्रीमद्भागवते इव अत्रापि मोक्षः आश्रयपदेन निरूपितः। यश्च आश्रयः सः सम्प्रज्ञातरूपः इति सम्प्रज्ञात समाधेः असम्प्रज्ञातस्य कारणत्वं असम्प्रज्ञातस्य सम्प्रज्ञातस्य कारणत्वमिति योगसिद्धान्तो निरूपितः। तथापि सम्प्रज्ञातस्य भगवतः दर्शनमेव सम्प्रज्ञातसमाधेः परमं फलमिति निश्चितम् ।

**योगाङ्गानि** -पूर्वोक्त मनो नियमने यः सफलः तथाविधः योगः यस्य सिद्धिः भवति सः योगी, मुमुक्षुः इत्युच्यते । मुच्लृ – मोचने ( रुदादि–परस्मैपदि–अनिट्) इति धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा (3/1/7) इति सूत्रेण मोक्तुमिच्छति इत्यर्थे सन् प्रत्यये सन्यङोः (6/1/9) इति द्वित्वे मुमुक्ष शब्दात् "सनाशंसभिक्ष उ;" (3/2/168) इति सूत्रेण उकारप्रत्यये मुमुक्षुः इति रूपम् । किमेवं व्युत्पत्तिः दर्शिता इति चेत् नायं रूढः शब्दः। किन्तु प्राणिनः आत्मानं भवबन्धेश्यः मोचयितुं इच्छा स्वयं जाता भवेत् एवं मोचन, मोचनेच्छा इति द्वयं यदा समान कर्तुकं भवति तदेव मुमुक्षशब्दः सार्थको भवति । स्वयं मुमुक्षुमेव बन्धेश्यः मोचयितुं गुरुरपि शक्नोति । अतः योगी स्वयं विरक्तो भवेदिति इत्यर्थः अस्मिन् श्लोके प्रतिपादितः।

**एवमत्यन्तवैशिष्ट्युक्त धर्मोपलक्षणः ।**

**यस्य योगस्य वैयोगी मुमुक्षुरभिधीयते ॥[2]**

प्रथमं योगासक्तः योग युक् इति लब्धब्रह्मज्ञानः विनिष्पन्न समाधिः इति व्यवहृतो भवति । कदाचित् जातवैराग्यस्यापि विघ्नान्तरायैः योगः भग्नो भवति तथापि युञ्जानस्य योगः जन्मान्तर साध्यः भवति ।

**यद्धन्तरायदोषेण दूष्यते चास्य मानसम् ।**

**जन्मान्तरैरभ्यसतो मुक्तिः पूर्वस्य जायते ॥**

**विनिष्पन्तसमाधिस्तु मुक्तिं तत्रैव जन्मनि ।**

**प्राप्नोति योगी योगाग्निदग्धकर्मचयोऽचिरात्॥[3]**

अभ्यासवैराग्याभ्यां तन्निरोधः " इति पातजलसूत्रार्थः एवात्र विवृतः। योगान्तरायाच बहवः योगदर्शने निरूपिताः।[4]
ततःप्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च॥ व्याधिस्त्यानसंशय प्रमादाऽलस्याडविरतिशभ्रन्ति
दर्शनालब्धभूमिकत्वाऽनवस्थितत्त्वानि चित्तविक्षेपास्तेऽन्तरायाः॥[5]

जातविघ्नस्यापि योगिनः तावता कृतस्य योगस्य फलानि सिद्धिरूपेण उत्तमजन्मलाभेन च फलिताः भवन्ति । जन्मान्तरेषु अभ्यासेन योगसिद्धिः च भवतीति विभूतिपादे त्रिंशदधिकैः सूत्रैः प्रतिपादितम्। कैवल्यपादे अपि कतिपय सूत्रैः निरूपितम् तत्फलं च ।

---

[1] विष्णुपुराणम् – षष्ठांशे – 7/28 to 31 श्लोकः

[2] विष्णुपुराणम् षष्ठांशे । 7/32 श्लोकः

[3]. विष्णुपुराणम् षष्ठांशे 7 / 34 श्लोकः, 35 श्लोकः

[4] पातञ्जलयोगदर्शनम्– समाधिपादः– 12 सूत्रम्

[5] पातञ्जलयोगदर्शनम्– समाधिपादः 29,30 सूत्रम्

**॥ जन्मौषधिमन्त्रतपः समाधिजाः सिद्धयः ॥**[6]

देहान्तरिता जन्मना सिद्धिः । औषधिभिरसुरभवनेषु रसायनेनेत्येवमादिः । मन्त्रैराकाशगमनाणिमादिलाभः । तपसा संकल्पसिद्धिः कामरूपी यत्र तत्र कामत्र इत्येवमादिः । समाधिजाः सिद्धयो व्याख्याताः।

तत्र कायेन्द्रियाणामन्यजातिपरिणतानाम् –

**॥ जात्यन्तर परिणामः प्रकृत्यापूरात् ॥**

पूर्वपरिणामापाय उत्तरपरिणामोपजनः तेषामपूर्वावयवानु प्रवेशाद्भवति । कायेन्द्रियप्रकृतयश्च स्वस्वं विकारमनुगगृह्णन्त्यापूरेण धर्मादिनिमित्तमपेक्षमाणा इति ।

" निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ॥“

न हि धर्मादि निमित्तं तत्प्रयोजकं प्रकृतीनां भवति । न कार्येण कारणं प्रवर्तत इति । कथं तर्हि वरणभेद तु ततः क्षेत्रिकवत् । यथा क्षेत्रिकः केदारादपां पूर्णात्केदारान्तरं पिप्लावयिषुः समं निम्नं निग्नंतर वा नापः पाणिनापकर्षत्यावरणं त्वासां भिनत्ति तस्मिन्भिन्ने स्वयमेवापः केदारान्तरमाप्लावयन्ति तथा धर्मः प्रकृतीनामावरणमधर्म भिनत्ति, तस्मिन् भिन्ने स्वयमेव प्रकृतयः स्वं स्वं विकारमाप्लावयन्ति । यथा वा स एव क्षेत्रिकस्तस्मिन्नेव केदारे न प्रथवत्यौद-कान् भौमान्वा रसान्धान्यमूलान्यनुप्रवेशयितुम् किं तर्हि मुद्गगवेधुकश्चामकादींस्ततोऽपकर्षति । अपकृष्टेषु तेषु स्वयमेव रसो धान्यमूलान्यनुप्रविशन्ति । तथा धर्मो निवृत्तिमात्रे कारणमधर्मस्य । शुद्ध्यशुद्ध्योरत्यन्तविरोधातात् न तु प्रकृतिप्रवृत्तौ धर्मो हेतुर्भवतीति । अत्र नन्दीश्वरादयः , उदाहार्याः

***यमाः**:- ब्रह्मचर्यादयः पञ्चयमाः मनसः योगार्हता सम्पादकाः निष्कामः एव यमानां सेवनं कुर्यात्। योगे साधुः योग्यः योगशब्दात् तत्र साधु (4/4/98) इति सूत्रेण यत्प्रत्ययः । यमानां सिद्धेः अनन्तरमेव योगार्हता इति तत्र भवः इति अर्थो न वाच्यः।

**ब्रह्मचर्यमहिंसा च सत्यास्तेयापरिग्रहान्।**
**सेवेत योगी निष्कामो योग्यतां स्वमनो नयन् ॥**[7]

***नियमाः**:- यमानामाचरणात् मनः शौचादीन् गुणान् प्राप्नोति तेन मनः नियतं भवति । स्वाध्यायः, शौचः, सन्तोषः तपः, ईश्वरप्रणिधानमिति पञ्चनियमाः । तेषु पूर्वे चत्वारः पञ्चमस्य प्रणिधानस्य साधकाः।

**स्वाध्यायशौचसन्तोषतपांसि नियतात्मवान्।**
**कुर्वीत ब्रह्मणि तथा परस्मिन्प्रवणं मनः ॥**
**एते यमास्सनियमाः पन्च पन्च च कीर्तिताः ।**
**विशिष्टफलदाः काम्या निष्कामाणां विमुक्तिदाः ॥**[8]

---

[6] पातञ्जलयोगदर्शनम्- कैवल्यपादे - 1 -3 सूत्राणि व्यासभाष्यच पुट.स 466- 471

[7] विष्णुपुराणम् षष्ठांशे- 7/36 श्लोकः

[8] विष्णुपुराणम्- षष्ठांशे- 7 / 37,38 श्लोकः

केवलं लौकिकजीवनमिच्छता अध्यात्मजीवने न श्रद्धदानस्यापि केनापि कामेन अनुसरत: अपि यमनियमा: विशिष्ट फलप्रदा: भवन्ति । निष्कामानों मुक्तिप्रदा: भवन्ति ।

***आसनम्** - यमनिममानां अनुष्ठानानन्तरं यथेच्छं पद्मासनादिषु अन्यतममासनं आश्रित्य मनस्समाधो युञ्जीत ।

**एकं भद्रासनादीनां समास्थाय गुणैर्युत:।**

**यमाख्यैनियमाख्यैश्च युञ्जीत नियतो यति:।।**[9]

***प्राणायाम**:- पूरण रेचन कुम्भकै: प्राणवायुं नियतं कृत्वा सबीजं निर्बीजं वा प्राणायामं अभ्यसेत् । रेचक- पूरकाभ्यां प्राणापानयो: परस्पराभिभव: भवति । तृतीयेन कुम्भकेन तयो: संयम: भवति इति त्रय: समाहृता: प्राणायामो भवति। सबीज समाधौ स्थूलरूपं आलम्बनं अभ्यासेन द्रष्टव्यम्। प्राणायामे इन्द्रियाणि शब्दादिष इन्द्रियार्थेष अनुरक्तानि कदाचित् भवेयु:। तदा इन्द्रियाणि विषयवासनाभ्य: प्रत्याहृतानि कुर्यात् ।

**प्राणाख्यमनिलं वाशचमभ्यासात्कुरुते तुयत् ।।**

**प्राणायामस्य विज्ञेयस्सबीजोऽबीज एव च ।।**

**परस्परेणाभिभवं प्राणापानौ यथानिलौ ।**

**कुरुतस्सद्विधानेन तृतीयस्संयमात्तयो: ।।**

**तस्य चालम्बनवत: स्थूलरूपं द्विजोत्तम ।**

**आलम्बनमनन्तस्य योगिनो ऽभ्यमत: स्मृतम् ।।**[10]

शब्दादिष्वनुरक्तानि निगृह्याक्षाणियोगवित्। कार्याञ्चित्तानुकारीणि प्रत्याहारपरायण:

*** प्रत्याहार**:- प्राणायामस्य विशेषाभ्यास: इदियाणां व्यापार निरोधको भवति । अत: प्राणायाम: तीव्रतर: एव प्रत्याहारस्य कारणं भवति । प्रत्याहृतं मन: शुभेषु अर्थेषु नियतं यथा भवति तथा मन: धारयेत्।

**वश्यता परमा तेन जायतेऽतिचलात्मनाम्।**

**इन्द्रियाणामवश्यैस्तैर्न योगी योगसाधक: ।।**

**प्राणायामेन पवने प्रत्याहारेण चेन्द्रिये ।**

**वशीकृते तत: कुर्यास्थितं चेतशशुभाश्रये ।।**[11]

*** धारणा** (क) धारणाकारणम् – भावनाय: त्रैविध्यं च – वासना शुभनिमित्ताशुभनिमिता इति द्विधा भवति । तदा शुभाश्रयंमन: मुक्तये कल्पते इति केशिध्वजवचनं श्रुता शुभाश्रयस्य लक्षणं ब्रूहि इति खाण्डिख्य: केशिध्वजं पृष्टवान् । येन शुभाश्रयेण चित्तमलोद्भव: दोष: हत: भवति तमाश्रयं शुभं ब्रूहि इति च । केशिध्वज: एवं उक्तवान् ।भावना त्रिविधा भवति । मन: मूर्तं ब्रह्म कदाचित् भावयति कदाचित् अमूर्तं भावयति एवं चिन्तनमेव भावना । सा त्रिविधा भवति 1. ब्रह्मभावना 2, कर्मभावना 3. उभयभावना च। ये च सनकसनन्दनादय: ते अमूर्तस्य ब्रह्मण: भावनया मुक्ता:। देवा: केवल कर्मभावनया युक्ता: ।

---

9विष्णुपुराणम्– षष्ठांशे– 7/39 श्लोक:

10 विष्णुपुराणम षष्ठांशे 7 /40 to 43 श्लोक:

11 विष्णुपुराणम् षष्ठांशे 7/44,45 श्लोक:

हिरण्यगर्भाय: उभयभावना युक्ता: । यदा जीवब्रह्मणो: भेदबुद्धि: तदा एतद्विश्वं ब्रह्मण: ।भिन्न पश्यति। अभेद बुद्धौ तत्ता मात्रगोचराम् वाचामगोचरं यत् ज्ञानं तत् ब्रह्म । तदेव ब्रह्म विष्णुरूपम् । वि.पु षट् 7/47-53 Ref)

**अक्षीणेषु समस्तेषु विशेषज्ञानकर्मसु ।**

**विश्वमेतत्परं चान्यद्भेदभिन्नदृशां नृणाम् ॥**

**प्रत्यस्तमितभेद यत्सत्तामात्रमगोचरम् ।**

**वचसामात्मसंवेद्यं तज्ज्ञान ब्रह्मसंज्ञितम् ॥**[12]

* **धारणा -** मूर्तस्य अमूर्तस्य उभयात्मकस्य वा वासुदेवे परब्रह्मणि मन: लग्नं कुर्यात् सैव धारणा ।

**एकपादं द्विपादं च बहुपादमपादकम् ।**

**मूर्तमेतद्धरे रूपं भावनात्रितयात्मकम्॥**

**एतत्सर्वमिदं विश्वं जगदेतच्चराचरम्।**

**परब्रह्मस्वरूपस्य विष्णोश्शक्तिसमन्वितम् ॥**[13]

नारायणात्मकमं सर्व जगत् चैतन्यरूपं भवति। सा च चैतन्यशक्ति: क्षेत्रज्ञनामिका, विष्णुशक्ति:, कर्मशक्ति: इति त्रिविधा। विष्णुशक्ति: स्थावरादिष्वारस्य ब्रह्मपर्यन्त भिन्नाप्रमाणेषु क्रमश: अधिका अवति । विष्णुशक्ति: योगध्येया विस्र: शक्तय: यस्मिन् प्रतिष्ठिता:। तदेव हरे: विश्वरूपम् इति पञ्चदशश्लोकै: प्रतिपादितम्।( वि पु .6/7/61 to 75 श्लोक: )

**यथाग्निरुद्धतशिख: कथं दहति सानिल: ।**

**तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्विषम् ॥**

**तस्मात्समस्तशक्तीनामाधारे तत्र चेतस:।**

**कुर्वीत संस्थितिं सा तु विज्ञेया शुद्धधारणा ॥**[14]

चित्तस्य धारणा प्रकार: एव पुन: कतिपय श्लोकै: वर्णित: । त्रिविधस्य दर्शन सिद्धये मूर्तस्य धारणं परमोपकारक भवति । प्रथमं मूर्तधारणया विना समाधे: सिद्धि: न भवतीति पुराणे स्पष्टसुपपादितम् ।

**मूर्तं भगवतो रूपं सर्वापाश्रयनि: स्पृरम्।**

**एषा वै धारणा प्रोक्ता यच्चित्तं तत्र धार्यते ॥**

**यच्च मूर्तं हरे रूपं यादृक् चिन्त्यं नराधिप ।**

**तच्छ्र्यतामनाधारा धारणा नोपपद्यते ॥**[15]

---

[12] विष्णुपुराणम् -षष्ठांशे 7 /52,53श्लोक:

[13] विष्णुपुराणम् -षष्ठांशे 7/59,60 श्लोक:

[14] विष्णुपुराणम् षष्ठांशे 7 / 74 ,75 श्लोक:

[15] विष्णुपुराणम् षष्ठांशे 7/78,79 श्लोक:

***ध्यानम्-**

समाधेः मूर्तस्य ब्रह्मणः नारायणस्य रूपधारणा कारणमित्युक्तम् । एवं धारणायां कृतस्तिरोयत्नः ध्यानं भवति । मूर्तं नारायणं भावयन् सर्वसु अवस्थासु तस्यैव चिन्तनेन त्रीव्रतरा धारणा ध्यानं भवति ।

**शार्ङ्गशङ्खगदाखङ्गचक्राक्षवलयान्वितम् ।**
**वरदाभयहस्तं च मुद्रिकारत्नशभूषितम् ॥**
**चिन्तयेत्तन्मयो योगी समाधायात्ममानसम्**
**तावद्यावद्दृढीभूता तत्रैव नृप धारणा ॥**
**व्रजतस्तिष्ठतोऽन्यद्वा स्वेच्छया कर्म कुर्वतः ।**
**नापयाति यदा चित्तासिद्धां मन्यन्ते तां तदा ॥**[16]

एवं ध्यानं संप्रज्ञात समाधेः कारणं भवति । यदा सम्प्रज्ञातस्य ध्यानस्य कारणेन स्वरूपदर्शनं भवति तदा क्रमेण शंखगदादि रहितं, रूपरहितं नारायणं भावयेत् । तदा प्रणिधानेन असम्प्रज्ञात समाधिरपि ध्यानेन भवति ।

**ततः शङ्खगदाचक्रशार्ङ्गादिरहितं बुधः ।**
**चिन्तयेद्भगवद्रूपं प्रशान्तं साक्षसूत्रकम्**
**सा यदा धारणा तद्वदवस्थानवती ततः।**
**किरीटकेयूर मुखैर्भूषणैः रहितं स्मरेत् ॥**
**तदेकावयवं देवं चेतसा हि पुनर्बुधः ।**
**कुर्यात्ततोऽवयविनि प्रणिधानपरो भवेत् ॥**[17]

*** समाधिः-** एवं पूर्वोक्तैः यमादिभिः पञ्चभिः बहिरङ्गसाधनैः अन्तरङ्गे प्रथमायाः धारणायाः च योगेन ध्यानं सम्पन्नं भवति । ध्यानेन प्रथमं सम्प्रज्ञातरूपदर्शनेन ततो निराकार दर्शनेन यत् ब्रह्मणो दर्शनं भवति स दर्शन विशेषः समाधिः। एवं ध्यान जन्यं विज्ञानं समाधेः कारणं भवति । विज्ञानं करणं क्षेत्रज्ञः करणयुक्तः, मुक्तिः कार्यम् इति करणकारणकार्यसम्पादनेन योगी समाधौ कृतकृत्यो भवतीति योगसिद्धान्तः पुराणे निरूपितः ।

**तद्रूपप्रत्यया चैका सन्ततिश्चान्यनिः स्पृहा ।**
**तद्ध्यानं प्रथमैरन्गैः षड्भिर्निष्पाद्यते नृप ॥**
**तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् ।**
**मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥**
**विज्ञानं प्रापकं प्राप्ये परे ब्रह्मणि पार्थिव ।**
**प्रापणीयस्तथैवात्मा प्रक्षीणाशेषभावनः ॥**
**क्षेत्रज्ञः करणी ज्ञानं करणं तस्य तेन तत् ।**

16 विष्णुपुराणम् षष्ठांशे– 7/85 –. 87 श्लोकः

17 विष्णु पुराणम् – षष्ठांशे 7/88–90 श्लोकः

**निष्पाद्य मुक्तिकार्यं वै कृतकृत्यो निवर्तते ॥**

**तद्भावभावमापन्नस्ततोऽसौ परमात्मना ।**

**भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत्॥**

**विभेदजनके ऽज्ञाने नाशमात्यन्तिकं गते ।**

**आत्मनो ब्रह्मणो भेदमसन्तं क: करिष्यति ॥**[18]

**उपयुक्तग्रन्थसूची –**


1. विष्णुपुराणम् गौरख्पूर्–गीताप्रेस्–2008.
2. पातञ्जलयोगदर्शनम्– समाधिपाद:।
3. योगयाज्ञवल्क्यसंहिता। अनुवाद: देवरकोंड शेषगिरिनाव:–विज्ञामन्जूषा–2012.
4. हठरत्नावली –श्रीनिवास: ।
5. श्रीमद्भागवतम्।
6. पुराणपर्यालोचनम् – चौखम्बा सुरभारती प्रकाशन – 2006
7. पुराणविमर्श: – बलदेवोपाध्याय: चौखम्बा संस्कृतप्रतिष्ठानम् – 1980
8. पुराणेतिहासयो: सांख्ययोगदर्शनविमर्श: –श्रीकृष्णमणित्रिपाठी– सम्पूर्णानन्द संस्कृत – विश्वविद्यालय:


[18] विष्णुपुराणम् षष्ठांशे 7/91 – 96 श्लोक: